# Shri Nilakantha Namah Shivaya Ashtakam

# श्रीनीलकण्ठ नमश्शिवायाष्टकम्

## Document Information

Text title : Shri Nilakantha Namashivaya Ashtakam

File name : nIlakaNThanamashshivAyAShTakam.itx

Category : shiva, aShTaka

Location : doc_shiva

Proofread by : Vani V.

Latest update : July 22, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 31, 2023

*sanskritdocuments.org*

# श्रीनीलकण्ठ नमश्शिवायाष्टकम्

नमो नमः कारणकारणाय
जगन्मयायाहितपाशकाय ।
त्वत्पादपद्माश्रितरक्षकाय
श्रीनीलकण्ठाय नमः शिवाय ॥ १॥

ध्यायन्ति ये त्वां यतयः स्तुवन्ति
हृदम्बुजे दीपसमप्रकाशम् ।
नासाग्रविन्यस्तविलोचनाय
श्रीनीलकण्ठाय नमः शिवाय ॥ २॥

सर्गस्थितिध्वंसनकारणाय
यमादियोगाष्टकसिद्धिदाय ।
तपस्विनां शीघ्रफलप्रदाय ।
श्रीनीलकण्ठाय नमः शिवाय ॥ ३॥

वेदादिरूपाय त्रिलोचनाय
वेदान्तवेद्याय दिगम्बराय ।
विभूतिशुभ्राय जटाधराय
श्रीनीलकण्ठाय नमः शिवाय ॥ ४॥

उग्राय संसारभयापहाय
ज्ञानप्रदायशुसुखप्रदाय ।
कालान्तकाय प्रलयानिलाय
श्रीनीलकण्ठाय नमः शिवाय ॥ ५॥

विधातृरूपाय जगद्धिताय
रमेशरूपाय सदाशिवाय ।
अनन्तरूपाय चतुर्भुजाय
श्रीनीलकण्ठाय नमः शिवाय ॥ ६॥

विश्वैकवन्द्याय कलाधराय
समस्तलोकैकसमाश्रयाय ।
कुठारपाशाङ्कुशपालिने च
श्रीनीलकण्ठाय नमः शिवाय ॥ ७॥

शर्वाय सर्वप्रियकारणाय
पिनाकिने बाणधराय तुभ्यम् ।
गौरीप्रियायाखिलपालकाय
श्रीनीलकण्ठाय नमः शिवाय ॥ ८॥

इति स्तुत्वा महादेवं प्रणम्य च पुनः पुनः ।
विदध्यू ऋषयस्तत्र सुराः पद्मभुवादयः ॥ ९॥

इति श्रीनीलकण्ठ नमः शिवायाष्टकं सम्पूर्णम् ।

It is said to be from Shri Garalapurinatha Mahatmya from Skanda Purana, however is not readily found in the Purana.

Proofread by Vani V.

*Shri Nilakantha Namah Shivaya Ashtakam*

pdf was typeset on July 31, 2023

Please send corrections to *sanskrit@cheerful.com*